**तार्य्य** त्रि॰ तॄ—कर्मणि ण्यत्। तरणीये। “नौतार्य्यां तां नदीं तरेत्” भा॰ शा॰ १२४६ श्लो॰ “नाव्यं त्रिलिङ्गं नौतार्य्यम्” अमरः। तरे देयम् ष्यञ्। २तरणार्थं देये शुल्के च। “भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः” मनुः।

**ताल** पु॰ तल एव अण्। १करतले शब्दार्थचि॰। ताड्यते तड—आघाते कर्मणि अच् डस्य लः। १हरिताले २तालीशपत्रे न॰ राजनि॰ ३दुर्गासिंहासने न॰ हेमच॰ तालस्येदम् अण् तस्य लुक्। ४तालफले न॰। अङ्गुष्ठमध्यमाभ्यां मिते ५परिमाणे ६करास्फालने ७कांस्यनिर्मितवाद्यभेदे (करताल) ८त्सरौ खड्गमुष्टौ च पु॰ मेदि॰ ९स्वनामख्याते वृक्षभेदे भावप्र॰।

“पक्वं तालफलं पित्तरक्तश्लेष्मविवर्द्धनम्। दुर्जरं बहुमूत्रञ्च तन्द्राऽभिष्यन्दशुक्रदम्। तालमज्जा तु तरुणः किञ्चिन्मदकरो लघुः। श्लेष्मलो वातपित्तघ्नः सस्नेहो मधुरः सरः। तालमज्जा तालफलवीजमज्जा। तालजं तरुणं तोयमतीव मदकृन्मतम्। अम्लीभूतं तदा तत् स्यात् पित्तकृद्वातदोषहृत्” भावप्र॰। “तालो द्वादशभिर्जानुपरिणाहपरिभ्रमैरिति” उक्ते १०मानविशेषे। हस्तेन जानुमण्डलपरिभ्रमणं यावत्या कालमात्रया क्रियते तावतीभिर्द्वादशभिस्तालाख्यः कालांशो ज्ञेयः इत्यर्थः।

११गीतकालक्रियामाने। अयं स्वर इयत्कालं गेयः इयत्कालं विलम्बित इयत्कालं द्रुतम् इयत्कालं मध्यमिति बोधयितुं ईदृशैर्हस्तैरङ्गुल्याकुञ्चनप्रसारणक्रियाभिर्नर्त्तितव्यं गातव्यञ्चेति कालक्रिययोः प्रमाणं तालः। इदमियत्कालं गेयमिति कालेनाङ्गुल्याद्याकुञ्चनादिक्रियामानं ताल इति यावत्। “कालस्य एकद्वित्रिमात्राद्युच्चारणनियमितस्य क्रियायाः परिस्पन्दात्मिकायाः परिच्छेदहेतुस्तालम्” इति मधुस्र॰। “कालेन नर्त्तनगलवादनक्रियाणां मानं तालः ताराद्येककालमेषां विरामस्ताल इत्यन्ये” इत्यमरटीकायां भरतः। तन्निरुक्तिस्तु गौरीहरयोर्नृत्येन तालो बभूव। तथा हि। हरनृत्यस्य ताण्डवं गौरीनृत्यस्य लास्यम् इति संज्ञा पुरुषनृत्यस्य ताण्डवं नारीनृत्यस्य लास्यमिति नियमात्। ताण्डवस्याद्याक्षरेण लास्यस्याद्याक्षरेण च मिलित्वा ताल इति संज्ञा जाता इति” संगीतशास्त्रे तस्य भेदा यथा “चञ्चत् पुट १ चाच पुटः २ ३षट्पितापुत्रकस्तथा। ४उद्घट्टकः ५सन्निपातः ६कङ्कणः ७कोकिलारवः। ८राजकोलाहलो ९रङ्गविद्याधर१०शचीप्रियौ। ११पार्वतीलोचनो १२राजचूडामणि १३जयश्रियौ १४वादकाकल १५कन्दर्प १६नलकूवर १७दर्पणाः। १८रतिलीलो १९मोक्षपतिः २०श्रीरङ्गः २१सिंहविक्रमः। २२दीपको २३मल्लिकामोदो २४गजलीलश्च २५चर्च्चरी। २६कुहक्को २७विजयानन्दो २७वीरविक्रम २८टेङ्किके। २९रङ्गाभरण ३०श्रीकीर्त्ति ३१यननालि३२चतुर्मुखाः। ३३सिंहनन्दन ३४नन्दीश ३५चन्द्रविम्ब ३६द्वितीयकाः। ३७जयमङ्गल ३८गन्धर्व ३९मकरन्द ४०त्रिभङ्गयः। ४१रतितालो ४२वसन्तश्च ४३जगझम्पो ४४ऽथ मारुतिः। ४५ कविशेखर ४६घोषौ च ४७हरवल्लभ४८भैरवौ४९। गतप्रत्यागतो ५०मल्लतालो ५१भैरवमस्तकः ५२। सरस्वतीकण्ठाभरणः ५३क्रीड़ा ५४निःसारुरेव च ।५५मुक्तावली ५६रङ्गराज५७भरतानन्दा५८ऽऽदितालकाः५९। सम्पक्वेष्टक६० इत्यादि ताला भरतसंमताः। संक्षेपतो निगदिता अथैषां लक्षणं तथा। अर्द्धमात्रं द्रुतं ज्ञेयमेकमात्रं लघु स्मृतम्। द्विमात्रन्तु गुरु ज्ञेयं त्रिमात्रन्तु प्लुतं मतम्। ताले चञ्चत्पुटे ज्ञेयं गुरु द्वन्द्वं लघुः प्लुतः १। गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे २। गलागलगलाश्चैव षट्पितापुत्रके मताः३। उद्घट्टके तु गममाः४ सन्निपाते गुरुर्मतः५। चतुर्विधः परिज्ञेयस्तालः कङ्कणनामकः ६। पूर्णः खण्डः समश्चैव विषमश्चैव कथ्यते। लचतुष्कं गणौ पूर्णे खण्डे विन्दुद्वयं गुरुः। यगणस्तु समे ज्ञेयस्तगणो विषमे भवेत्। खचतुष्कं सयत्यन्तं गुरुर्विन्दुचतुष्टयम्। सयत्यन्तं लघुश्चैव तालोऽयं कोकिलारवः ७ लचतुष्कं सयत्यन्तं खत्रयं खत्रयं लघुः। लघुर्विन्दुद्वयञ्चेति राजकोलाहलाभिधे ८। खद्वयं द्वौ प्लुतौ यत्र रङ्गविद्याधरः स तु ९। लघूनि त्रीणि यत्र स्युर्गुरूणि त्रीणि यत्र वै। प्लुतद्वयञ्च यत्रास्ति स तालः स्याच्छचीप्रियः १०। खद्वयं गुरुलौ विन्दुगौ प्लुतौ गौ प्लुतौ पुनः। यत्र तालः स विज्ञेयः पार्वतीलोचनाभिधः११। राजचूड़ामणौ विन्दुर्लश्च विन्दुर्लगौ मतौ१२। रगणोनो गुरुश्चैव जयश्रीरिति कथ्यते १३। प्लुतौ लघुचतुष्कञ्च मौ नौ द्रुतयुगं लघुः। लचतुष्कं विनाशब्दं तालः स्याद्वादकाकलः १४। द्रुतद्वयं यकारश्च कन्दर्पेऽपि प्रकीर्त्तितः१५। चत्वारो गुरवो यत्र चत्वारः प्लुतका अपि। लघ्वक्षराणि चत्वारि तालोऽयं नलकू-